सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ।”
(यथा, अभिज्ञानशकुन्तले ७ अङ्के ।
“अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्वीक्ष्य कृतस्मितेन ।
आमृष्टवक्षोहरिचन्दनाङ्का
मन्दार-माला हरिणा पिनद्धा ॥”)
पारिभद्रवृक्षः । पालिता मादार इति भाषा ।
यथा, अमरकोषे । २ । ४ । २६ ।
“पारिभद्रे निम्बतरुर्म्मन्दारः पारिजातकः ॥”
अर्कवृक्षः । आकन्द इति भाषा । यथा,—
“अर्काह्ववसुकास्फोतगणरूपविकीरणाः ।
मन्दारश्चार्कपर्णोऽत्र शुक्लेऽलर्कप्रतापसौ ॥”
इत्यमरः । २ । ४ । ८१ ॥
हस्तः । धूर्त्तः । इति मेदिनी । रे, १८७ ॥
तीर्थविशेषः । यथा,—
वराह उवाच ।
“शृणु सुन्दरि ! यत्नेन यन्मां त्वं परिपृच्छसि ।
कथयिष्यामि ते गुह्यां मन्दारस्य महाक्रियाम् ॥
क्रीड़मानोऽस्म्यहं तत्र दृष्ट्वा मन्दारपुष्पितम् ।
मन्दारपुष्पमादाय मनोज्ञं न्यस्य वै हृदि ॥
तत्रैकादशकुण्डानि निःसृतानि गिरौ धरे ।
विन्ध्ये च मत्प्रभावेन मन्दारस्य महाद्रुमः ॥
स्थितोऽहं तत्र सुभगे ! भक्तानुग्रहकाम्यया ।
दर्शनीयतमं स्थानं मनोज्ञं तु शिलातलम् ॥
यत्र तिष्ठाम्यहं देवि ! मन्दारद्रुममास्थितः ।
त्रिसन्ध्यं शृणु सुश्रोणि ! मन्दारेऽस्मिन् द्रुमे तथा ॥
द्वादश्याञ्च चतुर्द्दश्यां स पुष्प्यति द्रुमोत्तमः ।
तत्र मध्याह्नवेलायां वीक्ष्यमाणो जनैस्ततः ।
ततोऽन्यदिनमासाद्य दृश्यते न कदाचन ॥
तस्मिन् मन्दारकुण्डे तु एकभक्तोषितो नरः ।
स्नानं करोति शुद्धात्मा स गच्छेत् परमां
गतिम् ॥
अथ प्राणान् प्रमुञ्चेत कुण्डे मन्दारसंस्थिते ।
तपः कृत्वा वरारोहे ! मम लोकाय गच्छति ॥
तस्य चोत्तरपार्श्वे तु शापणं नाम तं गिरिम् ।
तिस्रो धाराः पतन्त्यत्र दक्षिणां दिशमास्थिताः ॥
स्नानकुण्डमिति ख्यातं तस्मिन् क्षेत्रे परं मम ।
दक्षिणे पतते धारा श्रवते चोत्तरासुखम् ॥
तत्र स्नातो वरारोहे ! एकरात्रोषितो नरः ।
मोदते दक्षिणे शृङ्गे तस्मिन् मेरौ शिलोच्चये ॥
तत्राथ मुञ्चते प्राणान् मम कर्म्मपरायणः ।
सर्व्वं सङ्गं परित्यज्य मम लोकं प्रपद्यते ॥
नाकपृष्ठं समासाद्य मोदते दैवतैः सह ।
तथात्र मुञ्चते प्राणान् कृतकृत्यः सुनिश्चितः ।
तारयित्वा कुलं सर्व्वं मम लोकं प्रपद्यते ॥
तस्य दक्षिणपूर्व्वेण समश्रोतो वराङ्गने ! ।
पतते विन्ध्यशृङ्गेषु अगाधश्च महाह्रदः ॥
तत्र स्नानन्तु यः कुर्य्यादेकभक्तोषितो नरः ।
मोदते पूर्व्वपार्श्वे तु तस्मिन्मेरौ शिलोच्चये ॥
अथात्र मुञ्चते प्राणान् मम चित्तव्यवस्थितः ।
छित्त्वा वै सर्व्वसंसारं मम लोकाय गच्छति ॥
मन्दारस्य तु पूर्व्वेण गुह्यं कोटरसंस्थितम् ।
यत्र धारा पतत्येका सुबलेन समन्विता ॥
तत्र स्नानं प्रकुर्व्वीत पञ्चभक्तोषितो नरः ।
मोदते पूर्व्वपार्श्वे तु तस्मिन् मेरौ शिलोच्चये ॥
तत्राथ मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
मेरुशृङ्गं समुत्सृज्य मम लोकञ्च गच्छति ॥
तस्य दक्षिणपार्श्वे तु गुह्यं विन्ध्यविनिःसृतम् ।
पञ्च धाराः पतन्त्यत्र सुबलेन समन्विताः ॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः ।
मोदते दक्षिणे शृङ्गे महामेरौ शिलोच्चये ॥
अथात्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
मेरुशृङ्गं परित्यज्य मम लोकं प्रपद्यते ॥
दक्षिणे पश्चिमे भागे मन्दारस्य यशस्विनि ! ।
तत्र धारा पतत्येका आदित्यसमतेजसा ॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः ।
मोदते पश्चिमे भागे ध्रुवो यत्र प्रवर्त्तते ॥
अथात्र मुञ्चते प्राणान् मम कर्म्मव्यवस्थितः ।
सर्व्वपापविनिर्म्मुक्तो मम लोके च मोदते ॥
तस्य पश्चिमपार्श्वे तु गुह्यं देवसमन्वितम् ।
चक्रावर्त्त इति ख्यातमगाधश्च महाह्रदः ॥
स्नानं करोति यस्तत्र पञ्चभक्तोषितो नरः ।
मोदते सर्व्वशृङ्गेषु स्वच्छन्दगमनालयः ॥
अथ वै मुञ्चते प्राणान् चक्रावर्त्ते महायशाः ।
शृङ्गान् सर्व्वान् परित्यज्य मोदते मम सन्निधौ ॥
देशं वायव्यमाश्रित्य तस्मिन् विन्ध्यशिलोच्चये ।
तिस्रो धाराः पतन्त्यत्र सुफलाश्चतयः शुभाः ।
तत्र स्नानं प्रकुर्व्वीत मम चित्तव्यवस्थितः ।
मोदते सर्व्वशृङ्गेषु एकचित्तसमाश्रितः ।
तथात्र मुञ्चते प्राणांस्तस्मिन् गुह्ये यशस्विनि ! ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥
तस्य त्रिक्रोशमात्रेण दक्षिणां दिशमाश्रितः ।
गुह्यं गम्भीरकं नाम अगाधश्च महाह्रदम् ॥
तत्र स्नानन्तु कुर्व्वीत अष्टभक्तोषितो नरः ।
मोदते सर्व्वद्वीपेषु सर्व्वत्र गमनालयः ॥
अथैवं मुञ्चते प्राणान् मम कर्म्मव्यवस्थितः ।
सर्व्वदोषान् परित्यज्य मम लोकं प्रपद्यते ॥
तस्य पश्चिमपार्श्वे तु गुह्यं मे परमं महत् ।
सप्त धाराः पतन्त्यत्र अगाधश्च महाह्रदः ॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः ।
मोदते शक्रलोकन्तु स्वच्छन्दगमनालयः ॥
अथ वै मुञ्चते प्राणान् स्वकर्म्मपरिनिष्ठितः ।
सर्व्वसङ्गं परित्यज्य मम लोकं प्रपद्यते ॥
मङ्गलं तस्य क्षेत्रस्य कथ्यमानं मया शृणु ।
स्यमन्तपञ्चकञ्चैव मन्दारस्य गिरौ मम ॥
तत्र तिष्ठामि सुश्रोणि ! विन्ध्यस्य गिरिमूर्द्धनि ।
मन्दारे परमं गुह्यं तस्मिन् गुह्यशिलोच्चये ॥
दक्षिणे संस्थितं चक्रं वामे स्थाने च वै गदा ।
लाङ्गलं मुषलञ्चैव शङ्खं तिष्ठति चाग्रतः ॥
य एतत् शृणुयान्नित्यं गुह्यं मन्दारसंहितम् ।
तव चैव प्रियार्थाय मम भक्तसुखावहम् ॥
एतन्न जानते कश्चिन्मम मायाविमोहितः ।
मुक्त्वा भागवतान् शुद्धान् ये च वाराहसंश्रि-
तान् ॥”
इत्यादि वाराहपुराणे भगवच्छास्त्रे मन्दार-गुह्यवर्णनं नामाध्यायः ॥

मन्दास्यं, क्ली, (मन्दं आस्यमस्मादिति ।) लज्जा । इति शब्दरत्नावली ॥

मन्दिकुक्कुरः, पुं, मत्स्यविशेषः । इति भूरि-प्रयोगः ॥ ग्रन्थान्तरे मल्लिकुकुड़ोऽपि पाठः ॥

मन्दिरं, क्ली, (मन्द्यते सुप्यतेऽत्र मन्द्यते स्तूयते इति वा । मदि ङ स्वपने स्तुतौ + “इषि मदिमुदीति ।” उणा० १।१५२। इति किरच् ।) गृहम् । इत्यमरः । २ । २ । ५ ॥ “मन्द्यते सुप्यतेऽत्र मन्दिरम् । मदि ङ स्वपने जाड्ये मदे मोदे स्तुतौ गतौ नाम्नीति इरः । नगरं मन्दिरं पुरमिति पुंनपुंसकयोररुणेन पठ्यते । स्त्रियां मन्दिरा च प्रयोगश्च मन्दिराथास्वरावानिति मधुसकुटादयः ।” इति तट्टीकायां भरतः ॥ * ॥ अथ भगवन्मन्दिरनिर्म्माणमाहात्म्यम् ।
“यः कारयेन्मन्दिरं केशवस्य
पुण्यांल्लोकान् स जयेच्छाश्वतान् वै ।
दत्त्वावासान् पुष्पफलाभिपन्नान्
भोगान् भुङ्क्ते कामतः श्लाघनीयान् ॥
आसप्तमं पितृकुलं तथा मातृकुलं नरः ।
तारयेदात्मना सार्द्धं विष्णोर्म्मन्दिरकारकः ॥
इमाश्च पितरो दैत्यगाथा गायन्ति योगिनः ।
पुरतो यदुसिंहस्य च्यवनस्य तपस्विनः ॥
अपि नः स्वकुले कश्चिद्विष्णुभक्तो भविष्यति ।
हरिमन्दिरकर्त्ता यो भविष्यति शुचिव्रतः ॥”
इति वामने शेषाध्यायः ॥ * ॥
अपि च । अग्निपुराणे ।
“ये ध्यायन्ति सदा बुद्ध्या करिष्यामो हरे-
र्गृहम् ।
तेषां विलीयते पापं पूर्व्वजन्मशतोद्भवम् ॥”
किञ्च ।
“समतीतं भविष्यञ्च कुलानामयुतं नरः ।
विष्णुलोकं नयत्याशु कारयेद्यो हरेर्गृहम् ॥”
किञ्च ।
“लक्षेणाथ सहस्रेण शतेनार्द्धेन वा हरेः ।
तुल्यं फलं समाख्यातमिहेश्वरदरिद्रयोः ॥”
विष्णुधर्म्मोत्तरे तृतीयकाण्डे ।
“कृत्वा वासगृहं तस्य देवस्य परमेष्ठिनः ।
राजसूयाश्वमेधानां फलेन सह युज्यते ॥
प्रासादे मृण्मये पुण्यं मयैतत् कथितं
द्विजाः
तस्माद्दारुमये पुण्यं कृते शतगुणं भवेत् ॥
ततो दशगुणं पुण्यं तथा शैलमये भवेत् ।
ततो दशगुणं लौहे ताम्रे शतगुणं ततः ॥
सहस्रगुणितं रौप्ये तस्मात् फलमवाप्नुते ।
ततः शतसहस्रं वै सौवर्णे द्विजसत्तमाः ॥
अनन्तं फलमाप्नोति रत्नचित्रे मनोहरे ॥”
स्कान्दे ।
“आरम्भे कृष्णधिष्ण्यस्य सप्तजन्मनि यत् कृतम् ।
पापं विलयमाप्नोति नरकादुद्धरेत् पितॄन् ॥
प्रासादपादे कृष्णस्य यावत्तिष्ठन्ति रेणुकाः ।